तैवस्ततोऽर्घ्यादिभिरर्हणैश्च
भवत्कृते पूजयामास मां सः ॥
ततस्त्वहं तं शनकैरवोचं
वृतः सहस्रैरभिपूज्यमानः ।
प्राप्तोऽस्मि ते विषयं धर्म्मराज !
लोकानर्हैयानहं तान् विधत्स्व ॥
यमोऽब्रवीन्मां न मतोऽसि सौम्य
यमं पश्येत्याह स त्वान्तपस्वी ।
पिता प्रदीप्ताग्निसमानतेजा
न तच्छक्यमनृतं विप्रकर्त्तुम् ॥
दृष्टस्तेऽहं प्रतिगच्छस्व तात
शोचत्यसौ तव देहस्य कर्त्ता ।
ददानि किञ्चापि मनःप्रणीतं
प्रियातिथेस्तव कामान् वृणीष्व ॥
तेनैवमुक्तस्तमहं प्रत्यवोचं
प्राप्तोऽस्मि ते विषयं दुर्निवर्त्तम् ।
इच्छाम्यहं पुण्यकृतां समृद्धान्
लोकान् द्रष्टुं यदि तेऽहं वरार्हः ॥
यानं समारोप्य तु मां स देवो
वाहैर्युक्तं सुप्रभं भानुमत्तत् ।
सन्दर्शयामास तदात्मलोकान्
सर्व्वांस्तथा पुण्यकृतां द्विजेन्द्र ! ॥”)

नाचिकेतुः, पुं, अग्निः । इति त्रिकाण्डशेषः ॥

नाटः, पुं, ( नट+भावे घञ् । ) नृत्यम् । देश-विशेषः । कर्णाटक इति ख्यातः । इति शब्द-रत्नावली ॥ ( तद्देशवासिनि, त्रि । यथा, राज-तरङ्गिण्याम् । १ । ३०२ ।
“वाहत्य चोलकर्णाटनाटादींश्च नरेश्वरान् ॥”)

नाटकं, क्ली, (नाटयतीति । नट+णिच्+ण्वुल् ।) गद्यपद्यप्राकृतभाषादिमयग्रन्थविशेषः । तत्-पर्य्यायः । महारूपकम् २ । इति त्रिकाण्ड-शेषः ॥ तस्य लक्षणं यथा,—
“नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।
विलासर्द्ध्यादिगुणवत् युक्तं नानाविभूतिभिः ॥
सुखदुःखसमुद्भूतिनानारससमन्वितम् ।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसाः सर्व्वे कार्य्यं निर्व्वहणेऽद्भुतम् ॥
चत्वारः पञ्च वा मुख्याः कार्य्यव्यापृतपूरुषाः ।
गोपुच्छाग्रसमाग्रन्तु बन्धनं तस्य कीर्त्तितम् ॥”
इति साहित्यदर्पणे । ६ । २७७ ॥
अपि च ।
“नाटकं स्यात् प्रकरणं व्यायोगोऽङ्कस्तथा डिमः ।
ईहामृगः प्रहसनं भानः समवकारकः ॥
वीथीति भरतः प्राह नाट्येषु दशरूपकम् ।
नाटिका प्रेक्षणश्चैव त्रोटकं शाकटं तथा ॥
गोष्ठीसंलापशिल्पानि भानीहल्लीशरासकौ ।
उल्लापकं श्रीगदितं प्रस्थानं नाट्यरासकम् ॥
दुर्म्मल्लिका लासिका च काव्यञ्चोपरूपकम् ।
स्यात सप्तदश संख्यन्तु लक्षणस्तत्र कथ्यते ॥
प्रख्यातोत्तमनायकं रसमयं राजर्षिवंशोद्भवं
साङ्कं भङ्गजयान्वितं लयमयं तत्तत्पुराणाश्रयम् ।
भाषावैभवसुन्दरं प्रविलसन्नानाविलासं वलद्-
वृत्तिव्याप्तमशेषसन्धिसहितं सप्ताङ्कवन्नाटकम् ॥”
अन्ये तु ।
“देवतानां मनुष्याणां राज्ञां लोके महात्मनाम् ।
पूर्ब्बवृत्तानुचरितं प्रख्यातोदात्तनायकम् ॥
प्रवेशकविविष्कम्भादिभिः सन्धिभिरन्वितम् ।
इतिहासकथोद्भूतं सुखदुःखोदयैर्युतम् ॥
षट्पञ्चदशसप्ताष्टनवाङ्कैरनुभूषितम् ।
नानाविलासलीलाभिः सर्व्वसिद्धिभिरन्वितम् ॥
नानाभावरसैगाढं नाटकं सूरयो विदुः ।
किञ्चिदङ्गविहीनन्तु न त्याज्यं नाटकं क्वचित् ॥
आरम्भश्च प्रयत्नश्च प्राप्तिः सम्भव एव च ।
नियता च · लप्राप्तिः फलयोगस्तथापरः ॥
इत्यवस्थाप ञ्चं स्यात् नाटके कार्य्यवस्तुनः ।
संस्कृतं प्राकृतं भूतभाषाप्रभ्रंशिका गिरः ।
नाटके नियताः शस्ता एता भाषा रसावहा ॥
भाषाविभाषाभेदेन प्राकृतन्तु चतुर्द्दश ॥
मागध्यावन्तिका प्राच्या शौरसेन्यर्द्धमागधी ।
वाह्लीका दाक्षिणात्याश्च भाषाः सप्त च प्राकृते ॥
शकाराभीरचाण्डालशवरद्रविडौड्रजाः ।
वनौकसीविजातीनां विभाषाः सप्त कीर्त्तिताः ॥
कैकेयी शौरसेनी च काञ्ची पाञ्चालमागधी ।
द्राविड़ी पाण्डुदेशी च भूतभाषा प्रकीर्त्तिताः ॥
वैदर्भी मागधी नाटी काम्बोजी चोपनागरी ।
पाञ्चाली षड़पभ्रंशभाषा स्युर्द्देशभेदतः ॥
देवतादर्शनान्तश्च कर्त्तव्यं नाटकं बुधैः ।
राजर्षिदर्शनान्तं या तेऽपि देवैः समा मताः ॥
उदाहरणम् । मुरारिकवेरनर्घराघवं भवभूते-रुत्तररामचरितं कालिदासस्याभिज्ञानशकु-न्तलञ्चेत्यादि । इति नाटकलक्षणम् ।” इति सङ्गीतदामोदरः ॥

नाटकः, पुं, (नट्यते नृत्यते देवयोनिभिरत्र । नट+घञ् । ततः स्वार्थे कन् । यद्वा, नाटयतीति नट+णिच्+ण्वुल् ।) कामाख्यास्थपर्व्वतभेदः । यथा,—
“ऐशान्यां नाटके शैले शङ्करस्य महाश्रमम् ।
नित्यं वसति तत्रेशस्तदधीना तु पार्व्वती ॥”
इति कालिकापुराणम् ॥
(नाटकशाला । यथा, रामायणे । १ । ५ । १२ ।
“वधूनाटकसङ्घैश्च संयुक्तां सर्व्वतः पुरीम् ॥”
नटतीति । नट+ण्वुल् । ) नर्त्तके, त्रि । इति व्याकरणम् ॥

नाटाम्रः, पुं, तरम्बुजः । तत्पर्य्यायः । चैलालः २ चित्रफलः ३ सुखाशः ४ राजतेमिषः ५ लता-पनसः ६ सेंदुः ७ । इति त्रिकाण्डशेषः ॥

नाटारः, पुं, ( नट्या नटस्य वा अपत्यम् । “आर-गुदीचाम् ।” ४ । १ । १३० । इति आरक् । ) नट्या अपत्यम् । इति मुग्धबोधव्याकरणम् ॥

नाटिका, स्त्री, ( नाटक+टापि अत इत्वम् । ) नाटकविशेषः । यथा,—
“कैशिकीवृत्तिसंयुक्ता नारीपरिजनोज्ज्वला ।
चतुर्थसन्धिहीना च नाटिका नृपनायिका ॥
इयं शृङ्गारबहुला ततः स्यात् कैशिकीमयी ।
म्हद्दीयं कैशिकीवृत्तिर्न स्यादन्यरसाश्रया ॥
न कुञ्जरकराघातमात्रं शक्नोति कन्दली ।
लास्यां विटः पीठमर्द्दः सखयो वाद्यसञ्चयः ॥
अन्तःपुरचरो राज्ञ ईर्षद्विष्टो विदूषकः ।
यत्र भार्य्याजितो राजा निभृतः काममाचरेत् ॥
अन्तःपुरगतां कन्यां देवीगुप्तां यियासति ।
मन्त्रिणि न्यस्तराज्यस्तु सुखसंस्थापितः प्रभुः ॥
युवा भूमिपतिः प्रायो निभृतः काममाचरेत् ॥
कन्यामिह परिणयविषयां देवीगुप्तां महिषीं ज्ञानविरहेण ॥ एके तु ।
चतुर्भिरङ्कैरुत्पाद्यन्तिस्त्रिभिर्नृपनायकम् ।
यत् कैशिकीरसप्रायं नाटकं सैव नाटिका ॥
पूर्ब्बक्रमान्नाटकक्रमाद्रत्नावली नाटिका ।
एवमन्यत्रेद्वोह्यः ।” इति सङ्गीतदामोदरः ॥
(अस्या लक्षणं यथा, साहित्यदर्पणे । ६।५३६ ।
“नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतु-रङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥
स्यादन्तःपुरसम्बन्धा सङ्गीतव्यापृताथवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा ॥
सम्प्रवर्त्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः ।
देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ॥
पदे पदे मानवती तद्वशः सङ्गमो द्वयोः ।
वृत्तिः स्यात् कौशिकी स्वल्पविमर्षाः सन्धयः पुनः ॥”)

नाटेयः, पुं, ( नट्या अपत्यम् । नटी+ढक् । ) नटीसुतः । इति मुग्धबोधव्याकरणम् ॥

नाटेरः, पुं, ( नट्या अपत्यमिति । नटी+ढ्रक् । ) नटीसुतः । इति हेमचन्द्रः । ३ । २१२ ॥

नाट्यं, क्ली, ( नटानां कार्य्यम् । नट+“छन्दोगौक्थिकयाज्ञिकबह्वृचनटात् ञ्यः ।” ४ । ३ । १२९ । इति ञ्यः । ) नृत्यगीतवाद्यम् । तत्पर्य्यायः । तौर्य्यत्रिकम् २ । इत्यमरः । १ । ७ । १० ॥ ( यथा, देवीभागवते । १ । ७ । ३० ।
“नाट्यं तनोषि सगुणा विविधप्रकारं
नो वेत्ति कोऽपि तव कृत्यविधानयोगम् ॥”)
नटानां समूहः । इति व्याकरणम् ॥ नाट्या-रम्भनक्षत्राणि यथा । अनुराधा १७ धनिष्ठा २३ पुष्यः ८ हस्ता १३ चित्रा १४ स्वाती १५ ज्येष्ठा १८ शतभिषा २४ रेवती २७ ॥ इति ज्योतिषम् ॥ * ॥ नाट्यफलं यथा,—
“देवर्षिक्षितिपालपूर्ब्बचरिताण्यालोक्य धर्म्मादय-स्तत्तत्तावाश्रितभूमिकाभिनयने स्यादर्थसिद्धिः परा ।
संगीतायुतचित्तवृत्तिभरणा वश्या भवन्त्यङ्गना ज्ञानं शङ्करसेवयेति कथितं नाट्यं चतुर्व्वर्ग-दम् ॥
यो यस्य दयितो भावः स तं नाट्ये निरीक्षते ।
अतः सर्व्वमनोहारि नाट्यं कस्य न रञ्जकम् ॥”